## कर्मधारयवदुत्तरेषु। (११/२१४६)

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत् कार्यं भवति [1]इत्येतद्वेदितव्यम्। कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि (म.भा. ३.३६८)। सुब्लोपः – पटुपटुः। मृदुमृदुः। [2]पण्डितपण्डितः। पुंवद्भावः – पटुपट्वी। मृदुमृद्वी। कालककालिका। कोपधाया अपि हि कर्मधारयवद्भावात् पुंवत्कर्मधारयः (६.३.४२/७४६) [3]इति पुंवद्भावो भवति। अन्तोदात्तत्वम् – पटुपटुः। पटुपट्वी। समासान्तोदात्तत्वमनेनैव[4] विधीयते इति परत्वादाम्रेडितानुदात्तत्वं बाध्यते। अधिकारेणैव सिद्धे यत् उत्तरेषु इति वचनं तद्विस्पष्टार्थम्[5]॥

## प्रकारे गुणवचनस्य। (१२/२१४७)

प्रकारो भेदः सादृश्यं च। तदिह सादृश्यं प्रकारो गृह्यते। प्रकारे वर्तमानस्य गुणवचनस्य द्वे भवतः। [6]पटुपटुः। [7]मृदुमृदुः। पण्डितपण्डितः। [8]अपरिपूर्णगुणः इत्यर्थः। परिपूर्णगुणेन न्यूनगुणस्यो[9]पमाने सत्येवं प्रयुज्यते। जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यते। [10]पटुजातीयः, मृदुजातीयः इत्यपि [11]हि भवति। [12]तत् कथम्? वक्ष्यमाणम् अन्यतरस्यांग्रहणमुभयोः शेषो विज्ञायते। प्रकारे इति किम्? पटुर्देवदत्तः। गुणवचनस्य इति किम्? अग्निर्माणवकः। गौर्वाहीकः। यद्यप्यत्राग्निशब्दो गोशब्दश्च [13]मुख्यार्थसम्बन्धादवभूतभेदं तैक्ष्ण्यजाड्यादिकमर्थान्तरे गुणविशेषमेव प्रतिपादयितुं प्रवृत्तः, तथापि सर्वदा गुणवचनो न भवति इति न द्विरुच्यते।

[८८३] आनुपूर्व्ये द्वे भवत इति वक्तव्यम्। (म.भा. ३.३६९)

मूले मूले स्थूलाः। अग्रेऽग्रे सूक्ष्माः। ज्येष्ठं ज्येष्ठं [14]प्रवेशय।

[८८४] स्वार्थेऽवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम्। (म.भा. ३.३६९)

अस्मात् कार्षापणादिह भवद्भ्यां माषं [15]माषं देहि। [16]स्वार्थे एतद् द्विर्वचनम्, न वीप्सायाम्। अत्र हि द्वावेव माषौ दीयेते, न सर्वे कार्षापणसम्बन्धिनो माषाः, तेन [17]वीप्सा न विद्यते। अवधार्यमाणे इति किम्? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि, द्वौ माषौ देहि, त्रीन् वा माषान् देहि। अनेकस्मिन् इति किम्? अस्मात् कार्षापणाद् इह भवद्भ्यां माषमेकं देहि[18]।

[८८५] चापले द्वे भवत इति वक्तव्यम्। (म.भा. ३.३६९)

सम्भ्रमेण प्रवृत्तिश्चापलम्। अहिरहिः, बुध्यस्व बुध्यस्व। नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ, किं तर्हि, यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः प्रयोक्तव्याः। अहिरहिरहिः, बुध्यस्व बुध्यस्व बुध्यस्व इति।

[८८६] क्रियासमभिहारे द्वे भवत इति वक्तव्यम्। (म.भा. ३.३६९)

[19]स भवान् लुनीहि लुनीहि इत्येवायं लुनाति।

---

1. एतद् नास्ति ड.इ. 2. पण्डितपण्डितः नास्ति इ. 3. इति कार्यं भवति इ. 4. एव नास्ति इ. 5. ज्ञापकार्थम् वा इत्यधिकम् क.इ. 6. पटुपटु मृदुमृदु क.इ. 7, मृदुमृदुः नास्ति ह. 8. अपरिपूर्णगुणः इत्यर्थः नास्ति क. 9. उपमानभावे ह. 10. तेन इत्यधिकम् ह. 11. हि नास्ति इ.ह. 12 तत्–देवदत्तः नास्ति क. इ.ह.ड. 13. मुख्यार्थसम्बन्धेन क.ह. 14. अनुप्रवेशय क.इ.ड. 15. माषं नास्ति ह. 16. स्वार्थ इति स्वार्थ एव क.इ. 17. वीप्सायोगः क.इ.ड. 18. एकमेव देहि इत्यर्थः इत्यधिकम् ह. 19. सभवान् नास्ति क.ब.